इत्यादीनि वृत्त० उक्तानि ज्ञेयानि। त्रि०। २अनुपमचरिते त्रि०

**असमस्त** त्रि० सम+अस—क्त न०त०। १असंक्षिप्ते २व्यस्ते "एते व्यस्ताः समस्ता वेति" विश्वामित्रवचनव्याख्याने "व्यस्ताः असमस्ताः" प्रा०त० रघु०। ३असमग्रे व्याकरणोक्त-समासशून्ये विभक्त्यादिकार्य्ययुक्ते ४विग्रहवाक्ये न०।

**असमाति** त्रि० समं साम्यमतति अत—इन् न०त०। अतुल्ये अनुपमे "एवाहि जातो असमात्योजाः" ऋ० ६, २९, ६।

**असमान** त्रि० न०ब०। अतुल्ये। "समानं लघु चाशौचं पूर्व्वेणैव विशुध्यति। असमानं द्वितीयेन" यमः।

**असमानयानकर्म्मन्** पु० न समानं तुल्यकालिकं यानकर्म्म यत्र। सन्धिभेदे। त्वमग्रे याहि ततोऽहं यास्यामीति समयं कृत्वा यत्र पूर्व्वोत्तरं जिगीषुभ्यां गम्यते तादृशे यानकर्म्मरूपे सन्धौ। [२समाप्तिशून्ये त्रि०।

**असमापन** न० अभावे न०त०। १संपूर्त्त्यभावे न०ब०।

**असमाप्त** त्रि० न समाप्तः। १असम्पूर्णे "असमाप्ते व्रते चैव नैव कुर्य्यात् व्रतान्तरम्" स्मृतिः। संकल्पपूर्व्वकगृहीतव्रतस्यास-मापने व्रतान्तरस्याकर्त्तव्यताऽत्रोक्ता। आरब्धकर्म्मणः सम्पूर्णता समाप्तिः। २तच्छून्ये च "असमाप्ते परि-कर्म्मणि स्मृतः" कुमा०। ३सम्यगप्राप्ते च।

**असमाप्ति** स्त्री अभावे न०त०। १समाप्त्यभावे न०ब०। २समाप्तिशून्ये त्रि०। ३सम्यगप्राप्तौ स्त्री ४तच्छून्ये त्रि०

**असमावृत्त** पु० न०त०। समावृत्तः चीर्णब्रह्मचर्य्यतया गुरु-णानुमतः गुरुकुलादावृत्तः गृहस्थकर्म्मकरणाय कृत-समावर्त्तसंस्कारः न०त०। तद्भिन्ने ब्रह्मचारिणि स्वार्थे कन् असमावृत्तकोऽप्युक्तार्थे। "मासिकान्नं तु यो-ऽश्नीयादसमावृत्त(वर्त्त)को द्विजः" मनुः। असमावर्त्त-कोऽप्यत्र।

**असमाहार** पु० समाहारो मेलनं संघातः सम्यगाहरणञ्च अभावे न०त०। १तदभावे न०ब०। २तच्छून्ये त्रि०।

**असमाहित** त्रि० न०त०। १समाधिशून्ये चित्तैका-ग्रताशून्ये २असन्निवेशिते च।

**असमीक्ष्यकारिन्** त्रि० समीक्ष्य विविच्य न करोतीति कृ+णिनि। १विवेचनामकृत्वैव कर्म्मकारके, २मूर्खे च।

**असमृद्धि** स्त्री ऋद्धेराधिक्यं समृद्धिः अभावे न०त०। १ऋद्ध्याधिक्याभावे "नात्मानमवमन्येत पूर्व्वाभिरसमृद्धिभिः" मनुः। न०ब०। २समृद्धिशून्ये त्रि०।

**असम्पत्ति** स्त्री अनुरूपात्मलाभः सम्पत्तिः लक्ष्मीश्च अभावे न०त०। १सम्पत्त्यभावे। न०ब०। २तच्छून्ये त्रि०।

**असम्पन्न** त्रि०। सम्पन्नः सम्पद्युक्तः अनुरूपात्मस्वरूपप्राप्तश्च न०त०। तद्भिन्ने। [२संबन्धशून्ये त्रि०।

**असम्पर्क** पु० अभावे न०त०। १संबन्धाभावे न०ब०।

**असम्पूर्ण** त्रि० यावत्पर्य्यन्तानुसरणे समाप्तिस्तद्वान् सम्पूर्णः न०त०। तादृशपूर्त्तिशून्ये। यथा असम्पूर्णं चन्द्रमण्डलम् "क्रूरग्रहः सकेतुश्चन्द्रमसंपूर्णमण्डलमिदानीम्" मुद्रारा०

**असम्पृक्त** त्रि० न०। १असंबद्धे २असंयुक्ते।

**असम्प्रज्ञात** त्रि० न सम्यक् ज्ञातः ज्ञेयादिभेदो यत्र। पातञ्ज-लोक्ते ज्ञेयज्ञानज्ञातृभेदशून्ये निर्विकल्पके १समाधौ। समाधिस्तावत् द्विविधः सम्प्रज्ञातः असम्प्रज्ञातश्च तत्राद्यः सविकल्पकः ग्राह्यग्रहणग्रहीतृप्रतिभासत्वात् तत्-प्रतिभासशून्यो निर्विकल्पकः सर्व्वविकल्पशून्यत्वादसम्प्रज्ञातो द्वितीयः यथाह पात० सूत्रादौ "क्षीणवृत्तेरभिजातस्य मणे-र्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" यथाऽ-भिजातस्यातिस्वच्छस्य मणेः स्फटिकादेः कुसुमाद्युपरक्तस्य स्वरूपाभिभवेन रक्ताद्याकारता भवति तथा अभ्यासवैरा-ग्याभ्यां क्षीणवृत्तेरभिभूतरजस्तमोवृत्तिकस्य चित्तस्य स्थूल-सूक्ष्मभूतात्मकग्राह्यैः ग्रहणैरिन्द्रियादिवृत्तिभिः ग्रहीत्रा च वितर्कविचारानन्दास्मितानुगमात् तदाकारतापत्तिः समा-धिर्भवति सेयं सम्प्रज्ञाताख्या समापत्तिः। तद्भिन्ना च असम्प्रज्ञाता समापत्तिः। संप्रज्ञातभेदादिकं च तच्छब्दे वक्ष्यते। अस्या एव च निर्वीज इति संज्ञान्तरम् "तस्यापि-निरोधात् निर्वीजः समाधिः" पात० सू० सत्वपुरुषा-न्यत्वख्यात्यनन्तरं परवैराग्यसंस्कारप्रचयेन तस्य सम्प्रज्ञात-समाधिसंख्यारस्य तत्प्रज्ञायाश्च निरोधे सति सर्व्वस्य सम्प्रज्ञातजन्यसंस्कारप्रवाहस्य निरोधात् समाप्ताधिकार-त्वेन चित्तस्य कृतकृत्यता स्यात् निमित्तापाये नैमित्तिकापाय इति न्यायेन निर्वीजः समाधिर्जायते स च "आगमेनानु-मानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" इत्युक्तः आगमेन श्रवणेन अनुमानेन मननेन ध्यानाभ्यासे योरसः परमवैराग्यं तेन प्रज्ञाप्रसादेन प्रज्ञां पुरुषसाक्षात्कारं संपादयन् योगं निर्वीजसमाधिं लभते इति तदर्थः कालक्रमेण निर्वीजसमाधिसंस्कार प्रलये सति स्वप्रकृतौ चित्तं लीयते हेत्वभावात्, कृत्यशेष-लक्षणाधिकारोहि चित्तस्य स्थितिहेतुः न हि कृतभोग-विवेकख्यातिकस्य चित्तस्य कृत्यशेषोऽस्ति येन तदधि-क्रियेत। प्रकृतौ चित्तस्य प्रलये च पुरुषः स्वरूपमात्रप्रतिष्ठः केवलो मुक्तो भवतीति" वृत्ति०। २सम्यगज्ञाते च।